# सर्वनामानि

एकवारं प्रयुक्तस्य नामपदस्य पुनः सूचनार्थं सर्वनामानि प्रयुज्यन्ते । संस्कृतभाषायां सर्वादीनि सर्वनामानि इत्युच्यन्ते ।

| | | | |
|---|---|---|---|
| 1. सर्व | 2. विश्व | 3. उभ | 4. उभय |
| 5. कतर | 6. कतम | 7. अन्य | 8. अन्यतर |
| 9. इतर | 10. त्वत् | 11. त्व | 12. नम |

एकवारं प्रयुक्तस्य नामपदस्य पुनः सूचनार्थं सर्वनामानि प्रयुज्यन्ते । संस्कृतभाषायां सर्वादीनि सर्वनामानि इत्युच्यन्ते ।

| | | | |
|---|---|---|---|
| 1. सर्व | 2. विश्व | 3. उभ | 4. उभय |
| 5. कतर | 6. कतम | 7. अन्य | 8. अन्यतर |
| 9. इतर | 10. त्वत् | 11. त्व | 12. नम |
| 13. सम | 14. सिम | 15. पूर्व | 16. पर |
| 17. अपर | 18. दक्षिण | 19. उत्तर | 20. अवर |
| 21. अधर | 22. स्व | 23. अन्तर | 24. त्यद् |
| 25. तद् | 26. यद् | 27. एतत् | 28. इदम् |
| 29. अदस् | 30. एक | 31. द्वि | 32. युष्मद् |
| 33. अस्मद् | 34. भवत् | 35. किम् | |

इमानि सर्वनामानि ।

सर्वनामशब्दानां सूक्ष्मस्वभावमाश्रित्य इमानि नवधा विभक्तानि ।

1 . पुरुषार्थकसर्वनामानि (Personal Pronouns)

2 . निर्देशकसर्वनामानि (Demonstrative Pronouns)

3 . व्यापेक्षकसर्वनामानि (Relative Pronouns)

4 . अव्यक्तवाचिसर्वनामानि (Indefinite Pronouns)

5 . बन्धवाचिसर्वनामानि (Correlative Pronouns)

6 . पारस्परिकसर्वनामानि (Reciprocal Pronouns)

7 . संबन्धवाचिसर्वनामानि (Possessive Pronouns)

8 . स्ववाचिसर्वनामानि (Reflexive Pronouns)

9 . सार्वनामिकभेदकानि (Pronominal Adjectives)

पुरुषार्थकसर्वनामानि।

अस्मद् , युष्मद् , भवत् इत्येतानि पुरुषार्थकसर्वनामानि इत्युच्यन्ते । अस्मद् युष्मद् शब्दयोः त्रिषु लिङ्गेषु समानं रूपमस्ति । भवत् शब्दस्य लिङ्गानुसारं रूपेषु त्रैविध्यं वर्तते ।

**'अस्मद् शब्दः'**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र . | अहम् | आवां | वयम् |
| द्वि . | मां/मा | आवां/नौ | अस्मान्/नः |
| तृ . | मया | आवाभ्यां | अस्माभिः |
| च . | मह्यं/मे | आवाभ्यां/नौ | अस्मभ्यं नः |
| प . | मत् | आवाभ्यां | अस्मत् |
| ष . | मम/मे | आवयोः नौ | अस्माकं , नः |
| स . | मयि | आवयोः | अस्मासु । |

**'युष्मद्' शब्दः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| | त्वं | युवां | यूयम् |
| द्वि . | त्वां/त्वा | युवां/वां | युष्मान्/वः |
| तृ . | त्वया | युवाभ्यां | युष्माभिः |
| च . | तुभ्यं/ते | युवाभ्यां/वां | युष्मभ्यं/वः |
| प . | त्वत् | युवाभ्यां | युष्मत् |

| | | | |
|---|---|---|---|
| ष . | तव/ते | युवयोः/वां | युष्माकं/वः |
| स . | त्वयि | युवयोः | युष्मासु |

भवत् शब्दः तकारान्तः आदरसूचकश्च भवति । भवान् ,भवती , भवत् इति पुल्लिङ्गे स्त्रीलिङ्गे नपुंसकलिङ्गे च अस्य रूपाणि विद्यन्ते । आदरस्य पारम्यप्रकाशनाय अत्रभवत् तत्रभवत् इत्यपि प्रयोगः अविरलः ।

**भवत् शब्दः पुंल्लिङ्गः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र . | भवान् | भवन्तौ | भवन्तः |
| सं . प्र . | हे भवन् | हे भवन्तौ | हे भवन्तः |
| द्वि . | भवन्तं | भवन्तौ | भवतः |
| तृ . | भवता | भवद्भ्यां | भवद्भिः |
| च . | भवते | भवद्भ्यां | भवद्भ्यः |
| प . | भवतः | भवद्भ्यां | भवद्भ्यः |
| ष . | भवतः | भवतोः | भवताम् |
| स . | भवति | भवतोः | भवत्सु । |

**भवत् शब्दः स्त्रीलिङ्गः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र . | भवती | भवत्यौ | भवत्यः |
| सं . प्र . | हे भवती | हे भवत्यौ | हे भवत्यः |
| द्वि . | भवतीं | भवत्यौ | भवतीः |
| तृ . | भवत्या | भवतीभ्यां | भवतीभिः |
| च . | भवत्यै | भवतीभ्यां | भवतीभ्यः |
| प . | भवत्याः | भवतीभ्यां | भवतीभ्यः |
| ष . | भवत्याः | भवत्योः | भवतीनां |

| | | | |
|---|---|---|---|
| स . | भवत्यां | भवत्योः | भवतीषु । |

**भवत् शब्दः नपुंसकलिङ्गः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र . | भवत् | भवती | भवन्ति |
| सं . प्र . | हे भवत् | हे भवती | हे भवन्ति |
| द्वि . | भवत् | भवती | भवन्ति |
| तृ . | भवता | भवद्भ्यां | भवद्भिः |
| च . | भवते | भवद्भ्यां | भवद्भ्यः |
| प . | भवतः | भवद्भ्यां | भवद्भ्यः |
| ष . | भवतः | भवतोः | भवतां |
| स . | भवति | भवतोः | भवत्सु । |

अस्मद् , युष्मद् शब्दयोः वैकल्पिकानि ह्रस्वरूपाणि वाक्यारम्भे वा , च , वा , ह , एव इत्यादीनाम् अव्ययानां समीपे वा न प्रयुज्यते ।

**निर्देशकसर्वनामानि** ।

तद् , एतत् , इदम् , अदस् इमानि निर्देशकसर्वनामानि भवन्ति । एतेषां त्रिषु लिङ्गेषु पृथक् पृथक् रूपाणि विद्यन्ते ।

**तद् शब्दः पुल्लिङ्गः।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. | सः | तौ | ते |
| द्वि. | तं | तौ | तान् |
| तृ. | तेन | ताभ्यां | तैः |
| च. | तस्मै | ताभ्यां | तेभ्यः |
| प. | तस्मात् | ताभ्यां | तेभ्यः |
| ष. | तस्य | तयोः | तेषां |

| | | | |
|---|---|---|---|
| स. | तस्मिन् | तयोः | तेषु |

**तद् शब्दः स्त्रीलिङ्गः।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र . | सा | ते | ताः |
| द्वि . | तां | ते | ताः |
| तृ . | तया | ताभ्यां | ताभिः |
| च . | तस्यै | ताभ्यां | ताभ्यः |
| प . | तस्याः | ताभ्यां | ताभ्यः |
| ष . | तस्याः | तयोः | तासां |
| स . | तस्यां | तयोः | तासु । |

**तद् शब्दः नपुंसकलिङ्गः।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र . | तत् | ते | तानि |
| द्वि . | तत् | ते | तानि |

शेषं पुंल्लिङ्गवद् रूपाणि ।

**तद् शब्दस्य प्रयोगः**

पूर्वपरामृष्टनामपदस्य सूचनाय तद् शब्दः प्रयुज्यते । यथा –

1 . पुरा दुष्यन्तो नाम राजा आसीत् । स महान् धर्मिष्ठः प्रजातत्परश्च आसीत् । (पुल्लिङ्गे)

2 . गङ्गा हिमालयाद् प्रभवति । सा काचन पुण्यनदी भवति । (स्त्रीलिङ्गे)

3 . सेवाफलं स्वादिष्ठं भवति । तत् अधिकमूल्ययुक्तं भवति ।(नपुंसकलिङ्गे)

**एतत् शब्दः**

एतत् शब्दः सन्निकर्षसूचकः । त्रिषु लिङ्गेषु अपि तस्य रूपाणि विद्यन्ते।

**एतत् शब्दः पुल्लिङ्गः**

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| एषः | एतौ | एते |
| एतम्/एनं | एतौ/एनौ | एतान्/एनान् |
| एतेन/एनेन | एताभ्यां | एतैः |
| एतस्मै | एताभ्यां | एतेभ्यः |
| एतस्मात् | एताभ्यां | एतेभ्यः |
| एतस्य | एतयोः/एनयोः | एतेषाम् |
| एतस्मिन् | एतयोः/एनयोः | एतेषु |

**एतत् शब्दः स्त्रीलिङ्गः ।**

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| एषा | एते | एताः |
| एतां/एनां | एते/एने | एताः/एनाः |
| एतया/एनया | एताभ्यां | एताभिः |
| एतस्यै | एताभ्यां | एताभ्यः |
| एतस्याः | एताभ्यां | एताभ्यः |
| एतस्याः | एतयोः/एनयोः | एतासाम् |
| एतास्यां | एतयोः/एनयोः | एतासु। |

इदं शब्दः इदं शब्दस्यापि त्रिषु लिङ्गेषु रूपाणि विद्यन्ते । शब्दोऽयं सन्निकृष्टातिशयसूचनार्थः भवति ।

**इदं शब्दः पुंल्लिङ्गः।**

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| अयं | इमौ | इमे |
| इमं/एनं | इमौ/ एनौ | इमान्/एनान् |
| अनेन/एनेन | आभ्यां | एभिः |

| | | |
|---|---|---|
| अस्मै | आभ्यां | एभ्यः |
| अस्मात् | आभ्यां | एभ्यः |
| अस्य | अनयोः/एतयोः | एषां |
| अस्मिन् | अनयोः /एनयोः | एषु। |

इदं शब्दः स्त्रीलिङ्गः

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| इयं | इमे | इमाः |
| इमां/एनां | इमे/एने | इमाः/एनाः |
| अनया/एनया | आभ्यां | आभ्यः |
| अस्यै | आभ्यां | आभ्यः |
| अस्याः | आभ्यां | आभ्यः |
| अस्याः | अनयोः/एनयोः | आसाम् |
| अस्यां | अनयोः/एनयोः | आसु । |

**इदं शब्दः नपुंसकलिङ्गः।**

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| इदं | इमे | इमानि |
| इदं | इमे | इमानि । (शेषं पुंल्लिङ्गवत्) |

**अदस् शब्दः पुंल्लिङ्गः।**

| एकचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| असौ | अमू | अमी |
| अमुं | अमू | अमून् |
| अमुना | अमूभ्यां | अमीभिः |

| | | |
|---|---|---|
| अमुष्मै | अमूभ्यां | अमीभ्यः |
| अमुष्माद् | अमूभ्यां | अमीभ्यः |
| अमुष्य | अमुयोः | अमीषां |
| अमुष्मिन् | अमुयोः | अमीषु । |

**स्त्रीलिङ्गः।**

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| असौ | अमू | अमूः |
| अमुं | अमू | अमूः |
| अमुया | अमूभ्यां | अमूभिः |
| अमुष्मै | अमूभ्यां | अमूभ्यः |
| अमुष्याः | अमूभ्यां | अमूभ्यः |
| अमुष्याः | अमूयोः | अमूषां |
| अमुष्यां | अमूयोः | अमूषु। |

**नपुंसकलिङ्गः।**

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| अदः | अमू | अमूनि |
| अदः | अमू | अमूनि। (शेषं पुंल्लिङ्गवत्) |

इदमस्तु सन्निकृष्टसमीपतरवर्ति एतत्तदोरूपा।

अदसस्तु विप्रकृष्ट तदिति परोक्षे विजानीयात् ।।

**प्रश्नार्थकसर्वनामानि – किं शब्दः।**

त्रिषु लिङ्गेषु अस्य प्रयोगः विद्यते ।

**पुंल्लिङ्गः।**

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|

| | | |
|---|---|---|
| कः | कौ | के |
| कं | कौ | कान् |
| केन | काभ्यां | कैः |
| कस्मै | काभ्यां | केभ्यः |
| कस्मात् | काभ्यां | केभ्यः |
| कस्य | कयोः | केषां |
| कस्मिन् | कयोः | केषु। |

**स्त्रीलिङ्गः।**

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| का | के | काः |
| काम् | के | काः |
| कया | काभ्यां | काभिः |
| कस्यै | काभ्यां | काभ्यः |
| कस्याः | काभ्यां | काभ्यः |
| कस्याः | कयोः | कासाम् |
| कस्यां | कयोः | कासु। |

**नपुंसकलिङ्गः।**

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| किं | के | कानि |
| किं | के | कानि। (शेषं पुंल्लिङ्गवत्) |

**अव्यक्तवाचिसर्वनामानि**

किं शब्देन सह अपि, चित् , चन शब्दान् च योजयित्वा अव्यक्तवाचिनिपदानि निष्पाद्यन्ते ।

किं पुंल्लिङ्गे

कः + चित्  – कश्चित्

कः + चन  – कश्चन

कः + अपि  – कोऽपि

किं स्त्रीलिङ्गे

का + चित्  – काचित्

का + चन  – काचन

का + अपि  – काऽपि

किं नपुंसकलिङ्गे

किम् + चित्  – किञ्चित्

किम् + चन  – किञ्चन

किम् + अपि  – किमपि

किं शब्दस्य त्रिषु लिङ्गेषु सर्वासु विभक्तिषु च अव्यक्तवाचिशब्दानां प्रयोगः सुलभाः वर्तन्ते ।

यथा – कस्यापि वानरस्य

कयापि तूलिकया

कस्मिन्नपि वने

कस्यांचित् नद्यां

केनापि कारणेन

इत्याद्याः प्रयोगाः।

**व्यापेक्षकसर्वनामानि**

व्यापेक्षकत्वात् – आश्रयत्वात् व्यापेक्षकम् इति नाम । स्वस्य अर्थपूर्तये इतरानाश्रयते एतत् इत्यर्थे अन्वर्थम् नाम ।

यद् शब्दः तच्छब्दम् आश्रयते ।

उदा – यः सम्यक् लिखति सः परीक्षायामुत्तीर्णो भविष्यति । 'यद्' शब्दः त्रिषु लिङ्गेषु प्रयुक्तः ।

यथा पुल्लिङ्गः।

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| यः | यौ | ये |
| यं | यौ | यान् |
| येन | याभ्यां | यैः |
| यस्मै | याभ्यां | येभ्यः |
| यस्मात् | याभ्यां | येभ्यः |
| यस्य | ययोः | येषाम् |
| यस्मिन् | ययोः | येषु। |

स्त्रीलिङ्गः।

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| या | ये | याः |
| यां | ये | याः |
| यया | याभ्यां | याभिः |
| यस्यै | याभ्यां | याभ्यः |
| यस्याः | याभ्यां | याभ्यः |
| यस्याः | ययोः | यासां |
| यस्यां | ययोः | यासु। |

नपुंसकलिङ्गः।

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| यत् | ये | यानि |
| यत् | ये | यानि। |

(शेषं पुंल्लिङ्गवत् रूपाणि)

यद् शब्दः भेदकस्वरूपः भवति । सङ्गात् एकस्य भेदकत्वं – विशेषत्वं यच्छब्देन उच्यते । तस्य तु भेदान्तराणि च बहुत्र दृष्टानि ।

| यथा –शब्दः | अर्थः |
|---|---|
| यत् | व्यक्तिभेदकः |
| यत्र | स्थलभेदकः |
| यदा | समयभेदकः |
| यदि | अवस्थाभेदकः |

**बन्धवाचिसर्वनामानि**

यद् + वत् – यावत्

तद् + वत् – तावत्

एतत् + वत् – एतावत्

किं + यत् – कियत्

इदं + यत् – इयत्

तद् + दृश् – तादृक्

एतत् + दृश् – एतादृक्

यत् + दृश् – यादृक्

इदं + दृश् – ईदृक्

किं + दृश् – कीदृक्

किं + अति – कति। ( नित्यबहुवचनम्)

इमानि बन्धवाचिसर्वनामानि इत्युच्यन्ते ।

यावत् शब्दः तकारान्तः –

| **पुंल्लिङ्गः** | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| | यावत् | यावतौ | यावतः |

| | | |
|---|---|---|
| यावत् | यावतौ | यावतः। |

(मरुत् शब्दवत्)

तादृक् शब्दः त्रिषु लिङ्गेषु वर्तते ।

| **पुंल्लिङ्गः** | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| | तादृक् | तादृशौ | तादृशः। |
| **स्त्रीलिङ्गः।** | एकवचनम् | द्विवचनम् | बहुवचनम् |
| | तादृक् | तादृशौ | तादृशः। |

(पुंल्लिङ्गवत्)

**परास्परिकसर्वनामानि।**

अन्य , इतर , पर इमानि पारस्परिकसर्वनामानि ।

यथा –

| | पुं. | स्त्री. | नपुं. |
|---|---|---|---|
| अन्य – अन्यः + अन्यः | अन्योन्यः | अन्योन्या | अन्योन्यम् |
| इतरः – इचरः+ इतरः | इतरेतरः | इतरेतरा | इतरेतरम् |
| पर – परः+ परः | परस्परः | परस्परा | परस्परम् |

विभक्तिप्रत्यया: उत्तरपदेन सह प्रयुज्यन्ते ।

7. संबन्धवाचिसर्वनामानि

यद् , एतत् , अस्मद् , युष्मद् , एतैः सह ईय , ईन , अक प्रत्ययान् योजयित्वा सम्बन्धवाचि सर्वनामपदानि निष्पद्यन्ते ।

| यथा – | | पुं. | स्त्री. | पुं. |
|---|---|---|---|---|
| तद् | – | तदीयः | तदीया | तदीयम् |
| एतत् | – | एतदीयः | तदीया | एतदीयम् |
| अस्मद् | – | अस्मदीयः | अस्मदीन | मामकः |

युष्मद्  –  त्वदीयः  त्वदीन  तावकः

**स्ववाचिसर्वनामानि।**

स्व , आत्मन् , इति शब्दौ प्रायेण स्ववाचिसर्वनामत्वेन स्वीक्रियेते।

यथा –सा आत्मानं कृतकृत्यं मन्यते ।

उध्दरेदात्मना आत्मानम् ।

आत्मवाचि आत्मीयवाचि च 'स्व' शब्दः सर्वनाम ।

आत्मवाचि पुंसि केवलम्। उदाः – स्वेन कृतमिदं सर्वम् ।

आत्मीयवाचि तु त्रिषु लिङ्गेषु च।

यथा –स्वः बालः (पुं)।

स्वा बालिका (स्त्रीलिङ्गः) ।

स्वं गृहम् (नपुं)।

**सर्वनामिकभेदकानि।**

अन्य, अन्यतर, इतर, एकतम, कतर, कतम, ततर, ततम, एतानि, सर्वनामिकानि ।

सर्व, विश्व, सम, सिम, उभ, उभय एतान्यपि अत्र अनुसन्धेयानि । पूर्व अवर , दक्षिण उत्तर, अपर, अधर, एतान्यपि सर्वनामिकपदानि ।